महाभय उपस्थित होने पर, महाविपत्ति काल में, घोरतम भय होने पर इस विद्या से रक्षा करनी चाहिये, त्रिकाल पाठ करने वाले साधक को कोई भय नही होता है॥२॥

सर्वान् कामानवाप्नोति मर्त्यो देवि न संशयः।
अष्टोत्तरशतं जपेत्साक्षाद् सिद्धीश्वरो भवेत्॥३॥

इस मर्त्यलोक में समस्त कामनाओं की पूर्ति कर लेता है, इस विद्या का अष्टोत्तरशत जप करने से सिद्धि होती है, वह साधक सिद्धीश्वर हो जाता है॥३॥

भुक्तौ मुक्तौ शान्तौ च श्वेत-पुष्पंविनिर्दिशेत्।
आकृष्टो च वशीकारे रक्तपुष्पं समर्पयेत्॥४॥

पुष्पार्चन में भुक्ति, मुक्ति और शान्ति की कामना के लिए श्वेत पुष्प से अर्चन करना चाहिए, आकर्षण, वशीकरण में रक्त पुष्प से समर्चन करना चाहिए॥४॥

स्तम्भने मोहने चैव पीतं पुष्पं विनिर्दिशेत्।
उच्चाटने मारणे च कृष्णपुष्पं च आनयेत्॥५॥

स्तम्भन और मोहन कार्य में पीले पुष्प से अर्चन करना चाहिए, उच्चाटन और मारण कार्य के लिए काले पुष्प से अर्चन करना चाहिए॥५॥

अनेनैव प्रकारेण ध्यानं स्यात् पुष्पवर्णकम्।
एवं पुष्पविधिः प्रोक्तः पूजादौ जपकर्मणि॥६॥

इसी प्रकार से कामनाओं के अनुसार विभिन्न वर्णों के पुष्पों का चयन तथा ध्यान करना चाहिए, इस पुष्पार्चन की विधि जप के पूर्व करना चाहिए॥६॥

हाथ में जल लेकर भगवती के बायें हाथ में पाठ समर्पण करके अष्टोत्तरशत पुष्पाञ्जलि प्रदान करे, समस्त कामना के लिए इक्कीस दिन वृद्धि क्रम से पाठ करे और पाठ के पहले और बाद मे १०८ पुष्पाञ्जलि समर्पित करे, अलग-अलग कामनाओं के लिए अलग-अलग पुष्पों का चयन करना चाहिए।

श्रीप्रत्यङ्गिरामालामहामन्त्रः परिपूर्णः

●

प्रत्यङ्गिराकवचम्

देव्युवाच

भगवन् • सर्वधर्मज्ञ सर्वशास्त्रार्थपारग!।
देव्याः प्रत्यङ्गिरायाश्च कवचं यत् प्रकाशितम्॥१॥

देवि ने कहा—हे भगवान्! हे सर्वधर्मज्ञ! हे सम्पूर्ण शास्त्रों के पारगामी भैरव प्रभो! सर्वार्थसाधन नामक प्रत्यङ्गिरा देवी का जो कवच आपने प्रकाशित किया है॥१॥

सर्वार्थसाधनं नाम कथयस्व मयि प्रभो।

हे प्रभो! वह सर्वार्थसाधन नामक कवच आप मुझसे कहिये।

भैरव उवाच

शृणु देवि! प्रवक्ष्यामि कवचं परमाद्भुतम्॥२॥

श्रीभैरव बाले—हे देवि! अत्यन्त अद्भुत सर्वार्थसाधन नामक उस कवच को मैं तुमसे कहता हूँ, सावधान होकर सुनों।

सर्वार्थसाधनं नाम त्रैलोक्ये चाऽतिदुर्लभम्।
सर्वसिद्धिमयं देवि! सर्वैश्वर्यप्रदायकम्॥३॥

सर्वार्थसाधन नामक कवच तीनों लोकों में परम दुर्लभ है, यह सभी ऐश्वर्य को प्रदान करने वाला तथा सर्वसिद्धिमय है॥३॥

पठनाच्छ्रवणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग् भवेत्।
सर्वासाधकस्याऽस्य कवचस्य ऋषिः शिवः॥४॥

इस कवच का पाठ करने तथा सुनने से इस मर्त्यलोक में मनुष्य त्रिलोकी के ऐश्वर्य का स्वामी हो जाता है। इस सर्वार्थसाधक नामक कवच के शिव ऋषि हैं॥४॥

छन्दो विराट् पराशक्तिर्जगद्धात्री च देवता।
धर्माऽर्थकाममोक्षेषु विनियोगः प्रकीर्तितः॥५॥

इस कवच का विराट् छन्द हैं, पराशक्ति हैं, जगद्धत्री देवता हैं, धर्माऽर्थकाममोक्ष के लिए इसका विनियोग किया जाता है॥५॥

विनियोगः—**ॐ श्रीसर्वार्थसाधककवचस्य शिवऋषिः, विराट्छन्दः, श्रीमत्प्रत्यङ्गिरादेवता, ऐँ बीजं, ह्रीँ शक्तिः, श्रीँ कीलकं श्रीसदाशिवदेवताप्रीत्यर्थे पाठे विनियोगः।**

ॐ प्रणवं मे शिरः पातु वाग्भवश्च ललाटकम्।
ह्रीँ पातु दक्षनेत्रं मे लक्ष्मीर्वाम सुरेश्वरी॥१॥

ॐकार प्रणव हमारे शिर की रक्षा करें, वाग्भव बीज ललाट की रक्षा करें, ह्रीँ बीज दक्ष नेत्र की रक्षा करें, लक्ष्मी बीज वामनेत्र की रक्षा करें॥१॥

प्रत्यङ्गिरा दक्षकर्णं वामे कामेश्वरी तथा।
लक्ष्मीः प्राणं सदा पातु वदनं पातु केशवः॥२॥

प्रत्यङ्गिरा देवी दाहिने कान की रक्षा करें, वामकर्ण की कामेश्वरी रक्षा करें, लक्ष्मी हमारे प्राणों की रक्षा करें, शरीर की केशव रक्षा करें॥२॥

गौरी तु रसनां पातु कण्ठं पातु महेश्वरः।
स्कन्धदेशं रतिः पातु भुजौ तु मकरध्वजः॥३॥

गौरी हमारे रसना की रक्षा करें, हमारे कण्ठ की महेश्वर रक्षा करें, हमारे कन्धों की रति रक्षा करें, हमारे भुजाओं की मकरध्वज रक्षा करें॥३॥

शङ्खनिधिः करौ पातु वक्षे पद्मनिधिस्तथा।
ब्राह्मी मध्यं सदा पातु नाभीं पातु महेश्वरी॥४॥

शङ्खनिधि हमारे हाथों की रक्षा करें, हमारे वक्षस्थल की पद्मनिधि रक्षा करें, ब्राह्मी हमारे मध्य भाग की रक्षा करें, हमारे नाभि की महेश्वरी रक्षा करें॥४॥

कौमारी पृष्ठदेशं तु गुह्यं रक्षतु वैष्णवी।
वाराहीं च कटिंपातु चैन्द्री पातु पदद्वयम्॥५॥

कौमारी हमारे पीठ की रक्षा करें, हमारे गुह्य देश की वैष्णवी रक्षा करें, वाराही हमारे कमर क्षेत्र की रक्षा करें, ऐन्द्री हमारे दोनों पैरों की रक्षा करें॥५॥

भार्यां रक्षतु चामुण्डा लक्ष्मी रक्षतु पुत्रकान्।
इन्द्रः पूर्वे सदा पातु आग्नेयां अग्निदेवता॥६॥

चामुण्डा हमारी भार्या की रक्षा करे, लक्ष्मी हमारे पुत्रों की रक्षा करें, इन्द्र हमे पूर्वदिशा में रक्षा करें, अग्निकोण में अग्नि रक्षा करें॥६॥

याम्ये यमः सदापातु नैर्ऋत्यां निर्ऋतिस्तथा।
पश्चिमे वरुणःपातु वायव्यां वायुदेवता॥७॥

दक्षिणदिशा में यम हमारी रक्षा करें, नैर्ऋत्यकोण में निर्ऋति रक्षा करे, पश्चिमदिशा में वरुण हमारी रक्षा करें, वायव्यकोण में वायु देवता हमारी रक्षा करें॥७॥

सौम्यां सोमः सदा पातु चैशान्यामीश्वरो विभुः।
ऊर्ध्वं प्रजापतिः पातु ह्यधश्चाऽनन्तदेवता॥८॥

उत्तरदिशा में सोम सदा ही रक्षा करें, ईशानकोण में विभु ईश्वर रक्षा करें, ऊर्ध्वदिशा से प्रजापति रक्षा करें, अधोदिशा से अनन्त देवता रक्षा करें॥८॥

राजद्वारे श्मशाने तु अरण्ये प्रान्तरे तथा।
जले स्थले चाऽन्तरिक्षे शत्रूणां निग्रहे तथा॥९॥

राजद्वार, श्मशान, अरण्य, नगर, जल, स्थल, अन्तरिक्ष में शत्रुओं के निग्रह के लिए॥९॥

एताभिः सहिता देवी चतुर्बीजा महेश्वरी।
प्रत्यङ्गिरामहाशक्तिः सर्वत्र मां सदाऽवतु॥१०॥

इन सभी वर्णों के सहित चार बीजाक्षरों वाली महामाहेश्वरी प्रत्यङ्गिरा महाशक्ति सर्वत्र हमारी सदैव रक्षा करें॥१०॥

फलश्रुतिः

इति ते कथितं देवि! सारात्सारं परात्परम्।
सर्वार्थ-साधनं नाम कवचं परमाद्भुतम्॥१॥

यह जो सर्वार्थ साधन नामक कवच को हमने कहा है, वह सर्वार्थसाधन नामक कवच परम अद्भुत तथा परात्पर सारों में सार है॥१॥

अस्याऽपि पठनात्सद्यः कुबेरोऽपि धनेश्वरः।
इन्द्राद्याः सकला देवाः धारणात्पठनाद्यतः॥२॥

इसके पाठ करने से सद्यः साधक कुबेर के समान धनवान् हो जाता है। इन्द्रादि समस्त देवताओं ने इसे ही धारण तथा पाठ करके समस्त सिद्धियों को प्राप्त किया था॥२॥

सर्वसिद्धीश्वरो सन्तः सर्वैश्वर्यमवाप्नुयुः।
प्रीतिमन्येऽन्यतः कृत्वा कमला निश्चला गृहे॥३॥

समस्त देवता सभी ऐश्वर्यों को तथा समस्त सिद्धियों को इसी से प्राप्त किये तथा इस कवच को प्रीतिपूर्वक धारण करने वाले को धन तथा घर में स्थिर सम्पत्ति होती है॥३॥

वार्णी च निवसेत् वक्त्रे सत्यं सत्यं न संशयः।
यो धारयति पुण्यात्मा सर्वार्थसाधनाभिधम्॥४॥

जो पुण्यात्मा इस सर्वार्थ साधन नामक विद्या को धारण करता है तथा पाठ करता है, उसके मुख में सरस्वती का निवास होता है, इसमें कोई भी संशय नही है॥४॥

कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः।
सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत्॥५॥

यह कवच परम पुण्यकारक है तथा इसे धारण करने वाला पुण्यों का वरण करता है और सभी ऐश्वर्य से युक्त होकर त्रैलोक्य में विजय प्राप्त करता है॥५॥

पुरुषो दक्षिणे बाहौ नारी वाम भुजे तथा।
बहुपुत्रवती भूयाद् बन्ध्याऽपि लभ्यते सुतम्॥६॥

इस कवच विद्या का पुरुष दक्षिण बाहु तथा नारि वाम बाहु में धारण करने से बहुत पुत्रवान् तथा बन्ध्या भी पुत्र का लाभ् प्राप्त करती है॥६॥

ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति तत्तनुम्।
एतत्कवचमज्ञात्वा यो जपेत्परमेश्वरीम्॥७॥

इस कवच के धारण करने वाले साधक का ब्रह्मास्त्रादि शस्त्र भी कुछ नहीं कर सकते, इस कवच को बिना जाने जो प्रत्यङ्गिरा महामन्त्र का जप करते हैं॥७॥

दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्युमाप्नुयात्।

वह परम दारिद्र्य को प्राप्त करता है, जीवन में तरह तरह के कष्टों को भोगता है तथा वह त्वरित ही मृत्यु प्राप्त करता है॥

श्रीरुद्रयामलतन्त्रे पञ्चाङ्गखण्डे प्रत्यङ्गिरायाः सर्वार्थसाधनं नामकं कवचं परिपूर्णम्

प्रत्यङ्गिरापटलः

मेरुपृष्ठे सुखासीनं भैरवं परमेश्वरम्।
प्रसन्न वदनं देवं नाग-यज्ञोपवीतिनम्॥१॥

मेरुपृष्ठ पर सुखासन से प्रसन्न मुख बैठे हुए, नागसंज्ञक (पवित्र) यज्ञोपवीत धारण किये हुए॥१॥

गजचर्मपराधीनं भूतिभूषणविग्रहम्।
कपालमालाभरणं गङ्गावीचिरिवाकुलम्॥२॥

गजचर्म विभूषित, विभूति (भस्म) का अङ्गों में अनुलेपन किये हुए, कपाल माला का आभूषण पहने हुए, गङ्गा के तरङ्गों की कलकल ध्वनि से शब्दायमान॥२॥

चन्द्रर्द्धार्चित-मूर्द्धानं सर्पकङ्कण-नूपूरम्।
खट्वाङ्ग-शूलपाशाऽसि-विभूषित-कराम्बुजम् ॥३॥

चन्द्रमा को अपने मस्तक पर धारण किये हुए, सर्प रूपी कङ्कण तथा नूपुर पहने हुए, अपने हाथों में खट्वाङ्ग, शूल, पाश, एवं खड्ग लिए हुए॥३॥

वामाङ्क-स्थितगौरीशं देव-गन्धर्व-सेवितम्।
यक्षेन्द्र-किन्नरनुतं ब्रह्माऽच्युत-नमस्कृतम्॥४॥

वाम अङ्ग में गौरी को विराजमान किये हुए, देवताओं और गन्धर्वों से सेवित, कुबेरादि यक्षों तथा किन्नरादि गणों द्वारा स्तुत, ब्रह्मा विष्णु से बारम्बार प्रणाम किये जाते हुए॥४॥

देव्युवाच

प्रहसन्तं जयन्तं च ध्यायन्तं च मुहुर्मुहुः।
स्मितपूर्वं प्रणम्यादौ बद्धाञ्जलिपुटं ततः॥५॥

जय विजय गणों के द्वारा बार-बार ध्यान किये जाते हुए, सदाशिव को मन्द हास पूर्वक प्रणाम एवं स्तुति करके खड़ी होकर पार्वती ने पूछा॥५॥

उत्थाय पार्वती देवि भगवन्तमभाषत।
भगवंस्त्वं परो देवस्त्रैलोक्यप्रभुरीश्वरः॥६॥

खड़ी होकर पार्वती देवी ने भैरव से कहा—हे भगवान्! आप परदेव हैं और त्रैलोक्य के प्रभु एवं सर्वसमर्थ हैं॥६॥

त्रिगुणात्मा गुणातीतश्चित्स्वरूपो निरञ्जनः।
सकलो निष्कलो देवः सत्तारूपो महेश्वरः॥७॥

त्रिगुणात्मा होते हुए भी गुणातीत हैं, चित्स्वरूप एवं निरञ्जन हैं, आप साकार तथा निराकार भी हैं, सत्ता रूप से सर्वत्र व्याप्त होकर भी महेश्वर हैं॥७॥

त्वं किं जपसि देवेश ममाद्य विदितं तु यत्।
तत्समाचक्ष्व सकलं यद्यहं तव वल्लभा॥८॥

हे देवेश! आप क्या जपते हैं? किसका जप करते हैं? उसका ज्ञान हमें आज तक नहीं हुआ। यदि मैं आपकी प्रिय वल्लभा हूँ तथा प्रसन्न हों, तो कृपया इस विषय को विस्तारपूर्वक बताइये॥८॥

भैरव उवाच

एतद् गुह्यतमं लोके न कस्य कथितं मया।
तथाऽपि तव देवेशि! भक्त्या गुह्यं वदाम्यहम्॥९॥

भैरव बोले—हे देवि! इस संसार में यह बहुत गुप्त है, जिसे आज तक हमने किसी से नही बताया, तथापि हे देवेशि! गुप्त होने पर भी तुम्हारी भक्ति के वश में हो कर मैं उसे तुमसे कह रहा हूँ॥९॥

या देवि! लोकमातेति महामाहेश्वरी शिवा।
प्रत्यङ्गिरेति विख्याता षड्विंशति सुवर्णिका॥१०॥

देवी लोकमाता, महामाहेश्वरी, शिवा एवं प्रत्यङ्गिरा के नाम से ख्यातिलब्ध हैं, जो छब्बीस वर्णाक्षरों से युक्त विद्या (मन्त्र) हैं॥१०॥

सृजते सकलं विश्वं बिभर्ति परमाम्बिकाम्।
अन्ते संहार-कर्त्री च संहरिष्यति तामसी॥११॥

जो परमा अम्बिका रजोगुण का आश्रय लेकर सारे विश्व का सृजन करती हैं, सतोगुण का आश्रय लेकर पालन करती हैं तथा अन्त में तमोगुण का आश्रय लेकर सम्पूर्ण संसार का संहार करती हैं॥११॥

गुणत्रयमयी विद्या महादारिद्र्यवारिणी।
तस्याः पञ्चाङ्गमीशानि पठाम्यहमहर्निशम्॥१२॥

जो त्रिगुणात्मिका महाविद्या हैं, महादारिद्र्य को वारण करने वाली हैं, हे ईशानि! दिन-रात मैं उन्हीं का पञ्चाङ्ग सेवन करता रहता हूँ॥१२॥

जपेद् विद्यां सर्वमेतां वर्मनामसहस्रकम्।
स्तवं मन्त्रमयं देवि! पठामि परमेश्वरीम्॥१३॥

मैं उस महाविद्या का सेवन करता रहता हूँ, उसी महाविद्या के ध्यान, मनन, निधिध्यासन में निमग्न रहता हूँ, उसी का कवच, सहस्रनाम तथा मन्त्रात्मक स्तोत्र का पाठ दिनरात करता रहता हूँ॥१३॥

तत्प्रसादादहं देवि! त्रैलोक्य-प्रभुरीश्वरः।
भैरवो भैरवादेशः सृष्टिस्थितिलयात्मकः॥१४॥

हे देवि! मैं उन्हीं के प्रसाद से त्रैलोक्य का प्रभु ईश्वर तथा भैरव हूँ, इन्हीं की कृपा से मेरी आज्ञा सभी पालन करते हैं तथा मैं ही इस जगत् का सृष्टि, स्थिति तथा प्रलय करता हूँ॥१४॥

देव्युवाच

भगवन् देव देवेश! निःशेष-करुणाकरः।
देव्या प्रत्यङ्गिरायाश्च पञ्चाङ्गं वक्तुमर्हसि॥१५॥

देवि ने पूछा—हे भगवान्! हे देवदेवेश! हे अशेष करुणाकर! प्रत्यङ्गिरा देवी का पञ्चाङ्ग मुझे बताने की कृपा करें?॥१५॥

भैरव उवाच

पटलं पद्धतिं चैव वर्मनामसहस्रकम्।
स्त्रोत्रमन्त्रमयं देवि! वक्ष्ये लोक-हितेच्छया॥१६॥

भैरव ने कहा—पटल, पद्धति, कवच, सहस्रनाम और मन्त्रात्मकमालामहामन्त्रस्तोत्र ये प्रत्यङ्गिरा के पञ्चाङ्ग कहे जाते हैं॥१६॥

आदौ पटलं दिव्यं मूलमन्त्रमयं परम्।
स यन्त्रमन्त्रतन्त्रश्च प्रयोगसहितं शृणु॥१७॥

हे देवि! सर्वप्रथम मन्त्रयन्त्रतन्त्रसहित, दिव्यपटल को प्रयोग के साथ सुनो॥१७॥

प्रणवं वाग्भवं माया लक्ष्मीः प्रत्यङ्गिरेति च।
मम रक्षद्वयं देवि! मम शत्रून् पदं मयि॥१८॥

सर्वप्रथम **मन्त्रोद्धार** कहते है—प्रणव (ॐ), वाग्भव (ऐं), माया (ह्रीं), लक्ष्मी (श्रीं) फिर **प्रत्यङ्गिरे** के बाद पुनः **मम रक्ष रक्ष** फिर **मम शत्रून्** के बाद॥१८॥

भक्षद्वयं प्रणवञ्च स्वाहान्तो मन्त्रोत्तमः।
एष विद्या मया ख्याता परमानन्ददायिनी॥१९॥

फिर दो बार भक्ष भक्ष फिर पुन प्रणव (ॐ) तथा स्वाहा पद जोड़ने से **ॐ ऐं ह्रीं श्रीं प्रत्यङ्गिरे मम रक्ष रक्ष मम शत्रून् भक्ष भक्ष स्वाहा ॐ** यह प्रत्यङ्गिरा का परम

उत्तम महामन्त्र है, इस परमानन्ददायिनी महाविद्या को हमने तुमसे कहा॥१९॥

भोगदा सुखदा देवी! राज्यदा धनदा तथा।
सिद्धिमोक्षप्रदाविद्या परासायुज्यदायिनी॥२०॥

हे देवि! यह महाविद्या भोग, सुख, राज्य, धन, सिद्धि तथा मोक्ष प्रदान करने वाली तथा परमसायुज्य प्रदान करने वाली है॥२०।

महागुरुप्रसादेन श्रीविद्या यदि लभ्यते।
विना गुरूपदेशेन नान्यत् सिद्ध्यति भारती॥२१॥

यदि महागुरुकृपा से यह श्रीमहाविद्या प्राप्त हो जाये तभी सिद्धि प्रदान करती है, विना गुरु के उपदेश के यह सिद्ध नहीं होती है, गुरुकृपा ही इस विद्या का एक मात्र प्राप्त करने का साधन है॥२१॥

नैवान्तरायो न क्लेशो न शौचनियमोऽपि वा।
साक्षात्सिद्धिप्रदो देवि! मन्त्रोऽयं भोगमोक्षदः॥२२॥

हे देवि! इस महाविद्या के सिद्धि के लिए किसी प्रकार के विघ्न और क्लेश की सम्भावना नही होती है, शौचादि कोई नियम भी नहीं है, यह महाविद्या सिद्धि तो प्रदान करती ही है तथा भोग और मोक्ष भी प्रदान करती है॥२२॥

वर्णलक्षं पुरश्चर्या तदर्द्धं वा महेश्वरी।
एकलक्षवधिं कुर्यान्नातो न्यूनं कदाचन॥२३॥

हे देवि! इस महाविद्या का पुरश्चरण वर्णलक्ष (मन्त्र में जितनी संख्या है उतने लाख की संख्या में जप करना अर्थात् २६ लाख जप का पुरश्चरण) संख्या है, यदि पूरा २६ लाख की संख्या में पुरश्चरण न कर सकें तो उसका आधा १३ लाख ही जप करे, यदि किसी कारण से उतना भी नहीं कर सकता है, तो उसका आधा ६ लाख पचास हजार ही जप करे, यदि किसी कारण वश उतना भी जप नहीं कर सकता है, तो कम से कम एक लाख जप का पुरश्चरण तो अवश्य ही करे, एक लाख से न्यून कभी न करे॥२३॥

जपाद् तद्दशांशतो होमस्तद्दशांशेन तर्पणम्।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम्॥२४॥

पुरश्चरण में जितना भी जप करे उसका दशांश हवन करे, हवन संख्या का दशांश तर्पण करे, तर्पण का दशांश मार्जन करे, तथा मार्जन का दशांश ब्राह्मण भोजन कराये। (इसमें उन ब्राह्मणों को भोजन कराना ही श्रेयस्कर होता है, जो इस महाविद्या का पुरश्चरण पूर्व-काल में कर लिए हों)॥२४॥

वटेऽरण्ये श्मशाने च शून्यागारे चतुष्पथे।
अर्धरात्रौ च मध्याह्ने पुरश्चरणमारभेत्॥२५॥

वट वृक्ष के नीचे, एकान्त जङ्गल में, श्मशान स्थान में, शून्य गृह में चतुष्पथ पर,

अर्धरात्रि के समय, मध्याह्न में प्रातःकाल में तथा सायं काल में विधिपूर्वक पुरश्चरण अवश्य करना चाहिए॥२५॥

जीवहीनो यथा देहः सर्वकर्मसु न क्षमः।
पुरश्चरणहीनो यो न मन्त्रफलदायकः॥२६॥

जिस प्रकार जीवहीन देह किसी काम के योग्य नहीं होता है, उसी प्रकार पुरश्चरण के बिना मन्त्र भी कभी भी फलदायक नहीं होता है (महादेव का यह कथन सभी प्रकार के मन्त्रों पर सामान्य रूप से लागू होता है, अर्थात् बिना पुरश्चरण के कोई भी मन्त्र फलप्रदान नहीं कर सकता है, पुरश्चरण से मन्त्रों में चैतन्यता आती है, अतः किसी भी मन्त्र का प्रयोग करने के पहले या गुरु से प्राप्त करते ही पुरश्चरण करके चैतन्य तुरन्त ही कर लेना चाहिये अन्यथा एक वर्ष बाद दीक्षा में प्राप्त किये गये मन्त्र निष्क्रिय हो जाते हैं और यदि तीन वर्ष तक पुरश्चरण नहीं किया जाता है, तो श्राप देकर मन्त्रदाता के पास चले जाते हैं, यह स्वयं महागुरु महादेव सदाशिव का वचन है)॥२६॥

मन्त्रमुत्कीलयेदादौ मन्त्रं सञ्जीवयेत्ततः।
निष्कौटिल्यञ्चत्पश्चात्ततः शापहरी जपेत्॥२७॥

सर्वप्रथम मन्त्र का उत्कीलन करना चाहिये, फिर प्राणप्रतिष्ठा करके उसे संजीवित करना चाहिए, तदनन्तर समस्त संस्कार करके उसके समस्त दोषों को समाप्त करना चाहिए, फिर शाप रहित करना चाहिए॥२७॥

सिद्धमन्त्रं जपेच्छुद्धं ततस्सम्पुटितं चरेत्।
क्रमेणानेन देवेशि! श्रीविद्यां यो जपेत्सुधी॥२८॥

इस प्रकार से समस्त संस्कारादि करके मन्त्र परमशुद्ध हो जाते हैं फिर पुरश्चरण करने से सिद्ध हो जाते हैं तथा सद्यः सिद्धि प्रदान करते हैं। हे देवि! जो बुद्धिमान् साधक इस क्रम से इस श्रीविद्या का जप करता है॥२८॥

स साधको भवेल्लोके भोगी सायुज्यमाप्नुयात्।
मन्त्रस्यास्य मुनिश्चैव महाभैरव एव च॥२९॥

वह साधक इस अति उत्तम महाविद्या को सिद्ध करके जबतक संसार में रहता है तबतक समस्त भोगों को प्राप्त करता है, अन्त में देवी का सायुज्य प्राप्त करता है। इस महाविद्या के महाभैरव ऋषि हैं॥२९॥

अनुष्टुप्छन्ददूत्युक्तः श्रीमत्प्रत्यङ्गिरेति च।
देवतास्या पराबीजं शक्तिः स्वाहा च कीलकम्॥३०॥

इसका अनुष्टुप्छन्द, श्रीमत्प्रत्यङ्गिरादेवता तथा पराबीजशक्ति तथा स्वाहा कीलक है॥३०॥

भोगापवर्गसिद्ध्यर्थं विनियोगः इति स्मृतः।
ध्यानमस्या प्रवक्ष्यामि सर्वतन्त्रेषु गोपितम्॥३१॥

भोगापवर्ग (भोग तथा मोक्ष) की सिद्धि के लिए इसका विनियोग कहा गया है। सभी तन्त्रों में सर्वथा गुप्त श्रीमत्प्रत्यङ्गिरा का ध्यान कहता हूँ॥३१॥

विनियोगविधि:—**ॐ अस्य श्रीप्रत्यङ्गिरामन्त्रस्य महाभैरवऋषि:, अनुष्टुप्छन्द:, श्रीप्रत्यङ्गिरादेवता, ऐंबीजं, ह्रींशक्ति:, श्रींकीलकं भोगापवर्गसिद्ध्यर्थे प्रत्यङ्गिरामन्त्र-जपे विनियोग:।**

ध्यानम्

आशाम्बरा मुक्तकुचा घनच्छवि:, ध्येया स चर्मासिकराहिभूषणा।
दंष्ट्रोग्रवक्त्रा ग्रसिता हितत्वया, प्रत्यङ्गिरा शङ्कर तेजसेरिता॥३२॥

दिगम्बर वेश धारण किये हुए, बिखरे हुए बालोंवाली, बादल के समान कान्तिवाली, हाथों में तलवार और ढाल लिये हुए, सर्पों का आभूषण धारण किये हुए, महाभयानक दाँतों से युक्त मुखवाली, श्रीशङ्कर से प्रेरणा प्राप्त कर समस्त शत्रुओं को मुख में चबाती हुई प्रत्यङ्गिरा देवी का ध्यान करना चाहिए॥३२॥

यन्त्रोद्धारं प्रवक्ष्यामि सर्वसिद्धिप्रवर्तकम्।
सर्व-सम्मोहनं चक्रं सर्वाशा-परिपूरकम्॥३३॥

सम्पूर्ण सिद्धियों को प्रदान करनेवाला, प्रत्यङ्गिरा यन्त्र का उद्धार कहता हूँ, जो मनुष्यों के सम्पूर्ण मनोरथों को परिपूर्ण करनेवाला है, इस यन्त्र को सर्व सम्मोहन नाम से सम्बोधित करते हैं॥३३॥

यन्त्रोद्धार:

विन्दुत्रिकोणं वसुकोणयुक्तं, पत्राष्टयन्त्रञ्च त्रिवृत्तयुक्तम्।
भूगेह-लक्ष्मी-खचितं च सिद्धिदं, प्रत्यङ्गिरा चक्रमेतन्मयोक्तम्॥३४॥

सर्व प्रथम विन्दु लिखे फिर अष्टकोण, फिर वृत्त लिखे, फिर पुन: अष्टदल कमल का निर्माण करे, पुन: तीन वृत्त का निर्माण करे तदनन्तर सर्वथा चौकोर तीन भूपुर का निर्माण करे, जो लक्ष्मी (**श्रीं**) से युक्त हो। इस प्रकार समस्त प्रकार की सिद्धि प्रदान करनेवाला प्रत्यङ्गिरा का सर्वसम्मोहन नामक यन्त्र बनेगा॥३४॥

लयागमस्य वक्ष्यामि यन्त्रराजस्य पार्वति।
येन श्रवणमात्रेण कोटिपूजाफलं लभेत्॥३५॥

हे पार्वति! लयागम में इस यन्त्रराज को हमने कहा है, अब इस यन्त्र पूजन विधि कहता हूँ, जिसके सुनने मात्र से करोड़ों गुना पूजा का फल प्राप्त होता है॥३५॥

इन्द्राद्यालोकपालाश्च ब्रह्माऽनन्ताङ्किता: प्रिये!।
वज्रादिहेतिसंयुक्ता: पूज्या भूगेहमण्डले॥३६॥

हे प्रिये पार्वति! ब्रह्मा अनन्त से युक्त इन्द्रादि दशदिग्पाल (इन्द्र, अग्नि, यम,

निर्ऋति, वरुण, वायु, सोम, ईशान, ब्रह्मा और अनन्त उसी क्रम से दशदिग्पालों के आयुधों वज्र, शक्ति, दण्ड, खड्ग, पाश, अंकुश, गदा, त्रिशूल, पद्म तथा चक्र) के साथ भूपुर में पूजन करना चाहिए।।३६।।

वायव्येशानपर्यन्तं दिव्यसिद्धौघमाप्नुयात्।
गरुश्च पुजयेद् देवि! पङ्क्तित्रितयमध्यगान्।।३७।।

वायव्य से ईशान पर्यन्त दिव्य, सिद्ध, मानवादि समूहों वाले गुरुओं का तीन पंक्तियों में पूजन करना चाहिए, तीन प्रकार के गुरु दिव्यौघ, सिद्धौघ तथा मानवौघ हैं।।३७।।

ब्रह्माद्या मातरः पूज्या भैरवाष्टकसंयुताः।
वामावर्त क्रमेणैव रक्तपुष्पैः विशेषतः।।३८।।

अष्टपद्मों में अष्टभैरवों से युक्त ब्राह्मी इत्यादि अष्टमातृशक्तियों का वामवृत्त के क्रम से विशेष करके रक्तपुष्पों से पूजन करना चाहिए।।३८।।

स्तम्भिनी मोहिनी चैव क्षोभिणी द्राविणी तथा।
जृम्भिणी भ्रामिणी रौद्री तथा संहारिणीति च।।३९।।

स्तम्भिनी, मोहिनी, क्षोभिणी, द्राविणी, जृम्भिणी, भ्रामिणी, रौद्री तथा संहारिणी महाशक्तियों का।।३९।।

वसुकोणे परा पूज्या महाचीन-क्रमेच्छुभिः।
वामावर्तेन देवेशि! परमार्थप्रदा सदा।।४०।।

इन आठ महाशक्तियों की महाचीन (अतिप्राचीन) पद्धति से पूजा करनेवाले साधकों को वामावर्त्त से अष्टकोणों में पूजा करनी चाहिए।।४०।।

काली च भद्रकाली च नित्या काली त्रिकोणगाः।
एताः सम्पूजनीयास्तु शिवाग्निः वामभागतः।।४१।।

जो सदैव मोक्ष तथा परमार्थ प्रदान करने वाली शक्तियाँ हैं, उनका त्रिकोण में शिव और अग्नि के वामभाग में काली, भद्रकाली तथा नित्यकाली का पूजन करना चाहिए।।४१।।

देवि! रत्नमयी पात्रे सौवर्णे पूजयेत् सुधीः।
लयाङ्गमेतदाख्यातं सर्वसिद्धिप्रदं शिवे।।४२।।

बुद्धिमान् साधक सुवर्णनिर्मित पात्र में देवी की रत्नमयी प्रतिमा की पूजा करे, हे शिवे! लयागम में ऐसा कहा गया है।।४२।।

प्रयोगा नष्टवक्ष्येऽहं शृणुष्वाहिता प्रिये!।
स्तम्भनं मोहनं चैव मारणाकर्षणे ततः।।४३।।

हे प्रिये पार्वती! अब स्तम्भन-मोहन-मारण-शान्ति-वशीकरण तथा आकर्षणादि कर्मों के लिए तथा।।४३।।

वशीकरोच्चाटनाख्ये शान्तिकं पौष्टिकं ततः।
एतेषां साधनं वक्ष्ये मन्त्रसिद्धिप्रवर्तकम्।।४४।।

वशीकरण, उच्चाटन, शान्तिकर्म तथा पुष्टिकर्म इस आठों के साधन भूत आठ प्रयोगों को कहता हूँ, जो त्वरित मन्त्र सिद्धि प्रदान करते हैं।।४४।।

येन श्रवणमात्रेण मन्त्रः कल्पद्रुमो भवेत्।
रवौ स्नात्वा जपेन्मूलं वटमूलं महेश्वरि!।।४५।।

इन मन्त्र को सुनने मात्र से मन्त्र कल्पद्रुम के समान समस्त कामनाओं की पूर्ति करता है। हे महेश्वरि! साधक सपरिवार रविवार को स्नानकर वटवृक्ष के नीचे बैठकर।।४५।।

अयुतं तद्दशांशेन हुनेदाज्यं सितां शटिम्।
गोधूमं मधुनाऽऽलोड्यं स्तम्भयेद्वादिनां रसनान्।४६।।

इस मन्त्र का दशहजार जप कर फिर उसका दशांश हवन शर्करा, सफेद शाटी, गोधूम और मधु को मिलाकर अग्नि में होम करे, तो वादियों (विवाद करने वाले शत्रुओं) के जिह्वा का स्तम्भन हो जाता है।।४६।।

जलसूर्येन्दुवातानां गतिरेषा च कामिनाम्।
अश्वत्थस्य तले जप्त्वा मूलविद्यां यथाविधिः।।४७।।

पीपल वृक्ष की नीचे मूल विद्या का बताये गये इस विधि से जप करने पर जल, सूर्य, चन्द्रमा और वायु की भी गति स्तम्भित हो जाती है।।४७।।

अयुतं तद्दशांशेन जुहुयात् सर्पिरेणजम्।
मासंकणाशाटिमिश्रं मोहनं जगतां भवेत्।।४८।।

इस महाविद्या का दशहजार जप करके उसका दशांश का घी, हरिण का मांस, और कणाशाटी मिला करके हवन करे तो सारा संसार मोहित हो जाता है।।४८।।

कुजे वा शनिवारे वा पित्र्यर्क्षे विष्टिसङ्गमे।
गत्वा श्मशानं देवेशि नत्वा दिग्भूत-भैरवान्।।४९।।

मङ्गलवार या शनिवार के दिन जब मघानक्षत्र और भद्राकाल हो, तो उस समय श्मशान में जाकर दिशाओं में रहने वाले भूतों और भैरवों को नमस्कार करके।।४९।।

चितां सम्पूज्य वीरेशे जपेदयुत-सङ्ख्यया।
चिताग्नौ जुहुयादाज्यं गुरुपुष्ये शतावरीम्।।५०।।

गुरुवार को पुष्य नक्षत्र हो, तो श्मशान में जाकर चितास्थान में वीरेश (भैरव) की पूजाकर इस मन्त्र का दशहजार जप करे, फिर चिताग्नि में घी के साथ शतावरी मिलाकर हवन करे।।५०।।

चण्डाल-केश-नखदन्त-मिश्रां च साधकः।
तर्पयेत्तद्दशांशेन भोजयेत् पात्र पूर्वकम्।।५१।।

चाण्डाल का केश, नख और दाँत से मिश्रित करके हवन करके, तद्दशांश तर्पणादि करके सत्पात्र को भोजन कराये, तो यमराज के समान भी शत्रु मर जाता है॥५१॥

शत्रुर्मृत्युसमानोऽपि मृत्युमायाति नाऽन्यथा।
करेऽरिमूले गिरिजे! जपेन्मूलं शिवेयुतम्॥५२॥

हे गिरिजे! हे शिवे! करीर के मूल में बैठ कर शिवा से युत होकर इस मन्त्र का दशहजार जप करने से किसी भी प्रकार का शत्रु मृत्यु को प्राप्त हो जाता है॥५२॥

हुनेदाज्यं वचां शुण्ठी वानर्यातिवलासम्।
मेनका पीनवक्षोजा स्वस्थाभ्याकर्षिता भवेत्॥५३॥

फिर बचा, मर्कटि, और अतिबाला को समान भाग मिलाकर होम करे, तो मोटे-मोटे स्तनों वाली पुष्ट गात्र वाली मेनका भी आकर्षित होकर चली आती है, सामान्य की तो कहना ही क्या॥५३॥

वानीर-मूले देवेशि! जपेदयुतसङ्ख्यया।
हुनेदाज्यं ह्यरघूतं नागवल्ली दलाकिङ्कतम्॥५४॥

हे देवेशि! वानीर (वेतवृक्ष) के नीचे बैठ कर इस मन्त्र का दश हजार जप करे, तथा घी, ह्यरघूत, नागवल्ली (पान का पत्ता)को॥५४॥

भूबिम्बं तर्पयेद्देविं दशांशेनैव साधकः।
शक्रोऽपि दासतां याति किं पुनः क्षुद्रमानुषः॥५५॥

भूबिम्ब मिलाकर दशांश हवन करे, उसका दशांश देवि का तर्पण करे, तो इन्द्र भी दास हो जाता है, क्षुद्र मनुष्यों का तो कहना ही क्या, वे तो वश में हो ही जाते है॥५५॥

क्रूरर्क्षे क्रूरवेलायां जपेत्प्रेतालये मनुम्।
अयुतं तु चितावह्नौ हुनेत्सर्पिः कणौषधान्॥५६॥

क्रूर नक्षत्रों (भरणी, कृत्तिका, आर्द्रा आदि नक्षत्रों में), क्रूर वेला में, श्मशान पर जाकर मन्त्र का दशहजार जप करे, फिर श्मशान की अग्नि में घी, कर्णी, ईष्णी को॥५६॥

जातीफलं पलं मैषं खररोमाणि पार्वती।
रिपूणां सहसा देवि! भवेदुच्चाटनं परम्॥५७॥

जातीफल, बकरे का मांस, गदहे के बाल के साथ मिलाकर होम करने से हे देवि! साधक के समस्त शत्रुओं का अत्यधिक उच्चाटन हो जाता है॥५७॥

नदीकूले जपेन्मन्त्रमयुतं साधकोत्तमः।
तद्दशांशं हुनेद्दाज्यं समृद्धिकं स पायसम्॥५८॥

उत्तम साधक किसी नदी के किनारे इस मन्त्र का दश हजार जप करके जप का दशांश हवन घी के साथ पायस का हवन करने से सभी प्रकार की समृद्धि प्राप्त होती है॥५८॥

कनकं तगरं रात्रौ तर्पयेत्तद्दशांशतः।
अतिवृष्टेरनावृष्टे मारीभीते महेश्वरी!॥५९॥

हे महेश्वरि! द्राक्षा, खीर, तगर, कनक (मदार) को मिलाकर रात्रि में हवन करके तद्दशांश तर्पण करने से अतिवृष्टि, अनावृष्टि, मारी, महामारी का महाभय शान्त हो जाता है॥५९॥

राजभीते महाव्याघ्रात् सद्यः शान्तिः प्रजायते।
महापर्वदिने देवि! यत्र तत्र जपेन्मनुम्॥६०॥

राजा का भय, महाव्याघ्रादि का भय सद्यः शान्त हो जाता है। महापर्व के दिन हे देवि! महामन्त्र का जैसे तैसे दशहजार जप करे॥६०॥

अयुतं तद्दशांशेन जुहुयादाज्यपायसम्।
शैलं सिन्दूर-मिश्रं च सपलं सलवङ्गम्॥६१॥

दशहजार जप करने के बाद उसका दशांश एक हजार घी तथा पायस (खीर अथवा खोवा) के साथ हवन करे, घृत पायस के साथ शैल (शिलाजीत) सिन्दूर के साथ लवङ्ग मिलाकर साथ हवन करे॥६१॥

ऐणं मांसं शरं मीनं सालं च सकुलत्थकम्।
मासवंशुकसद्धीत रजोवत्यम्बरान्वितम्॥६२॥

हरिण मांस, शर, मीन (मछली) साल (मैनसिल), कुलत्थ, आसव, जीव के शुक्र युक्त वस्त्र, रजस्वला के वस्त्र को एक में मिला करके हवन करके उसका दशांश तर्पण करे॥६२॥

हुत्वा च तर्पयित्वा च भोजयित्वा च साधकान्।
पितृणां देवतानां च ऋषीणां कुलिनां प्रिये॥६३॥

हवन तर्पण करके प्रत्यङ्गिरा के साधकों को भोजन कराये, तो हे प्रिये! साधक अपने पितरों, देवताओं, ऋषियों, अपने सपिण्ड, सगोत्र समस्त कुलों का देवताओं के दश हजार वर्ष कल्प तक महापुष्टि होती है, साधक के ऊपर पितर, ऋषि, देवता, सभी प्रसन्न रहते हैं तथा साधक का पोषण करते हैं॥६३॥

दिव्यकल्पायुतं देवि! महापुष्टिः प्रजायते।
सर्वथा सर्वदा नित्यं महाविद्यां जपेत्सुधीः॥६४॥

बुद्धिमान् साधक को चाहिए की सदा सर्वदा इस महाविद्या का नित्य प्रयत्नपूर्वक अवश्य जप करना चाहिए॥६४॥

दशांशं होमयेत्तत्र तर्पयेत्ततद्दशांशतः।
भोजयेत्तद्दशांशेन मन्त्री किं किं न साधयेत्॥६५॥

जप का दशांश होम करना चहिये तथा उसका दशांश तर्पण करना चाहिए फिर

तर्पण का दशांश मार्जन करना चाहिए, मार्जन का दशांश प्रत्यङ्गिरा के साधकों को भोजन करा कर साधक को अपने समस्त अभीष्ट कार्यों को साधना चाहिए॥६५॥

मूर्खो वागीशतां याति निर्धनो धनवान्भवेत्।
महादारिद्र्ययुक्तोऽपि भवेद् वैश्रवणोपमः॥६६॥

इस विधि से उपासना करने से मूर्ख व्यक्ति भी व्याख्यान देने वाला हो जाता है, महादरिद्र (निर्धन) भी धनवान हो जाता है और वह वैष्णवों में उत्तम हो जाता है॥६६॥

इह लोके भवेद् भोगी परत्र त्रिदिवं भजेद्।
इतीदं मन्त्र सर्वस्वं प्रत्यङ्गिरारहस्यकम्॥६७॥

जब तक इस संसार में जीवित रहता है तब तक उसे समस्त भोग की वस्तुएँ प्राप्त होती है, अन्त में वह उत्तम लोक को प्राप्त होता है, हे देवि! इस प्रकार समस्त मन्त्रों में गोपनीय सर्वस्व प्रत्यङ्गिरा रहस्य युक्त पटल हमने तुमसे कहा॥६७॥

पटलं गुह्यमीशानि गोपनीयं स्वयोनिवत्॥६८॥

हे ईशानि! इसे अपनी योनि के समान अत्यन्त गुप्त रखना चाहिए। साधक भी ऐसे तैसे को इस विद्या को कभी न बताये अन्यथा उस साधक का पतन हो जाता है॥६८॥

श्रीरुद्रयामलतन्त्रे पञ्चाङ्गखण्डे दशमहाविद्यारहस्ये प्रत्यङ्गिरापटलं परिपूर्णम्

श्रीप्रत्यङ्गिरापद्धतिः

मन्दरस्थं सुखासीनं भगवन्तं महेश्वरम्।
समुपागम्य चरणैः पार्वती परिपृच्छति॥१॥

मन्दराचल पर्वत पर सुखपूर्वक बैठे हुए भगवान् महामाहेश्वर के सन्निकट भगवती पार्वती ने पैदल जाकर उनसे पूछा?॥१॥

देव्युवाच

धारणीया महाविद्या प्रत्यङ्गिरा-शुभोदया।
नरनारीहितार्थाय बालानां रक्षणाय च॥२॥

देवी ने कहा—हे महेश्वर! समस्त स्त्री-पुरुषों के हित के लिए तथा बालकों की रक्षा के लिए शुभ फल देने वाली महाविद्या प्रत्यङ्गिरा ही सबको धारण करना चाहिए॥२॥

राज्ञां माण्डलिकानां च दीनानां च महेश्वर!।
विदुषां च द्विजातीनां विशेषेणाऽर्थसाधिनी॥३॥

हे महेश्वर! यह प्रत्यङ्गिरा महाविद्या माण्डलिक (सम्राट्), राजाओं, दीनजनों तथा विद्वानों का एवं द्विज जातिमात्र का विशेष रूप से मनोरथ सिद्ध करती है॥३॥

महाभयेषु घोरेषु विद्युदग्निभयेषु च।
व्याघ्र-दंष्ट्रा-कराघाते नदी-नद-समुद्रगे॥४॥

भयङ्कर से भयङ्कर महाभय उपस्थित होने पर बिजली एवं अग्नि के द्वारा भय उपस्थित होने पर, व्याघ्र के द्वारा घिर जाने पर, नदी, नद, समुद्र का भय उपस्थित होने पर इस महाविद्या से भयों का निराकरण करके कामनाओं की पूर्ति करना चाहिए॥४॥

श्मशानेदुर्गमेघोरे संग्रामे शत्रुसङ्कटे।
अभिचारेषु सर्वेषु रणेराजकुलेषु च॥५॥

श्मशान में, दुर्गम स्थान में, शत्रु के द्वारा घोर संग्राम में घिर जाने पर, मारणादि घोर अभिचार में राजकुलों के कोप से ग्रस्त हो जाने पर इस महाविद्या को धारण तथा पाठ करना चाहिए॥५॥

धारिता पाठिता देवि! समीहित-फलप्रदा।
पाठिता साधकेन्द्रेण कारयेत् स्वान् मनोरथान्॥६॥

समस्त आपत्ति विपत्ति उपस्थित होने पर इस महाविद्या को धारण करना तथा पाठ करना अथवा ब्राह्मणों के द्वारा पाठ करवाना चाहिए तथा अपने समस्त मनोरथों को पूरा करना चाहिए॥६॥

सौभाग्य जननीं नित्यं नृणां वश्यकरीं तथा।
तां सुविद्यां सुरश्रेष्ठ! कथयस्व मयि प्रभो!॥७॥

हे प्रभो! हे महेश्वर! मनुष्यों को समस्त प्रकार का सौभाग्य प्रदान करनेवाली, सबको वश में करने वाली, सुन्दर महाविद्या को हमसे कहें॥७॥

भैरव उवाच

साधु साधु महाभागे! जन्तूनां हितकारिणी!।
त्वद्वाक्येन सुरारिघ्ने! कथयामि न संशयः॥८॥

भैरव बोले—हे समस्त जगत् का हित करने वाली, हे माहाभागे पार्वति! तुम्हें शतश: साधुवाद है, जो इस प्रकार का प्रश्न किया, हे दैत्यनिषूदिनि! तुम्हारे पूछने पर मैं उस महाविद्या प्रत्यङ्गिरा को तुमसे कहता हूँ॥८॥

देवि! प्रत्यङ्गिराविद्या सर्वग्रहनिवारिणी।
मर्दिनीसर्वदुष्टानां सर्वपापप्रणाशिनी॥९॥

हे देवि! यह प्रत्यङ्गिरा महाविद्या सभी ग्रह बाधाओं को दूर करने वाली है, समस्त दुष्टों का मर्दन करने वाली तथा सारे पापों को विनष्ट करने वाली है॥९॥

सौभाग्यजननी देवि! बलपुष्टिकरी तथा।
चतुष्पथेषु घोरेषु वनेषु पवनेषु च॥१०॥

यह महाविद्या मनुष्यों को समस्त प्रकार का सौभाग्य प्रदान करती है तथा पुष्टि प्रदान करती है। चतुष्पथ में, घोर अरण्य में, महाभयानक तूफान में इस महाविद्या का स्वयं पाठ करना चाहिए या पाठ करवाना चाहिए।।१०।।

राजद्वारेषु दुर्भिक्षे महाभय उपस्थिते।
पठिता पाठिता विद्या सर्वसिद्धिकरी स्मृता।।११।।

राजद्वार में, दुर्भिक्ष आदि पड़ने पर, इस महाविद्या का पाठ करना या पाठ कराना चाहिए तथा समस्त कामनाओं की पूर्ति करना चाहिए।।११।।

लिखित्वा च करे कण्ठे बाहौ शिरसि धारयेत्।
मुच्यते सर्वपापेभ्यो मृत्युं नास्ति कदाचन।।१२।।

इस महाविद्या के मन्त्र एवं यन्त्र को लिख कर बाहु, हाथ, कण्ठ, तथा शिर पर धारण करने वाला मनुष्य सभी पापों से मुक्त हो जाता है तथा पाठ करने वाले की अकालमृत्यु कभी नही होती है।।१२।।

धारयेद्योगयुक्तो यस्तस्य रक्षा भवेद् ध्रुवम्।
धारिता वाऽर्चिता विद्या प्रत्यङ्गिराशुभोदिता।।१३।।

योग से युक्त होकर जो साधक इस महाविद्या को धारण करता है, उसकी रक्षा इस विद्या के द्वारा निश्चित ही होती है। जो भक्त प्रत्यङ्गिरा महाविद्या को धारण करता है या अर्चन करता है, उसका सभी प्रकार से निश्चय ही शुभ होता है।।१३।।

गृहे चैवाऽष्टसिद्धिश्च देव-राक्षस-पन्नगाः।
न तस्य पीडां कुर्वन्ति यं चाऽन्ये पीडकग्रहा।।१४।।

जो साधक प्रत्यङ्गिरा महाविद्या को धारण करता है अथवा अर्चन करता है, उसे अष्टसिद्धियाँ अवश्य प्राप्त हो जाती हैं उसे देव, दानव, यक्ष, गन्धर्व, पन्नगादि तथा पीड़ा प्रदान करने वाले ग्रह उसे कभी पीड़ा नहीं देते हैं।।१४।।

विद्यानामुत्तमा विद्या पठिता वाऽर्चिता सदा।
यस्याऽङ्गस्था महाविद्या प्रत्यङ्गिरा सुभाषिता।।१५।।

यह प्रत्यङ्गिरा महाविद्या सभी महाविद्याओं में उत्तम महाविद्या है, इन्हें प्रत्यङ्गिरा इस लिए कहते हैं कि पाठ करने तथा अर्चन करने से यह साधक के प्रत्येक अङ्ग में स्थित हो जाती हैं।।१५।।

सिद्धा सुसिद्धिदा नित्या विद्येयं परमा स्मृता।
श्रीमता घोररूपेण भाषिता घोररूपिणी।।१६।।

यह महाविद्या स्वयं सिद्ध है तथा अपने साधक को भी सिद्धि प्रदान करती है। यह विद्या नित्य तथा सर्वश्रेष्ठ महाविद्या है। यह परम ध्यान करने योग्य महाविद्या है। इस घोररूपिणी श्रीविद्या को हमने ही घोररूप धारण करके व्याख्यान किया था।।१६।।

प्रत्यङ्गिरा मया प्रोक्ता रिपून् हन्यान्न संशयः।
हरिच्चन्दनमिश्रेण गोरोचन-कुंकुमेन च॥१७॥

इस प्रत्यङ्गिरा महाविद्या को हमने ही कहा था, यह शत्रुओं का निश्चय ही नाश करती हैं, इसमें कोई संशय नही है, हरिचन्दन का गोरोचन तथा कुंकुम से मिश्रण बना करके॥१७॥

लिखित्वा भूर्जपत्रेषु धारणीया सदा नृभिः।
पुष्पधूपैर्विचित्रैश्च बल्युपहारपूजनैः॥१८॥

मिश्रण से भोजपत्र के ऊपर इस प्रत्यङ्गिरा विद्या का लेखन करके पुष्प, धूपदीप तथा बलि इत्यादि उपचारों से पूजन करके मनुष्यों को सदैव धारण करना चाहिए॥१८॥

पूजयित्वा यथान्यायं शान्तकुम्भेन वेष्टयेत्।
धारयेद्य इमां विद्यां निश्चितां रिपुनाशिनीम्॥१९॥

इस महाविद्या का लेखन कर विधिपूर्वक पूजन करके शान्ति कलश के समान अवेष्ठित करके जो मनुष्य धारण करता है, तो यह महाविद्या धारण करने वाले भक्तों के समस्त शत्रुओं को निश्चय ही नाश कर देता है॥१९॥

विलयं यान्ति रिपवः प्रत्यङ्गिराविधानतः।
यद्यत् स्पृशति हस्तेन यद्यत् खादति जिह्वया॥२०॥

साधक विधानपूर्वक प्रत्यङ्गिरा का अर्चन करके शत्रुओं को नष्ट कर देता है, प्रत्यङ्गिरा का अनुष्ठान करने वाला साधक जो-जो स्पर्श करता है, जो-जो अपने मुख से खाता है वह सभी॥२०॥

अमृतं तद्भवेत् सर्वं मृत्युर्नास्ति कदाचन।
कर्मणा यो जपेद्यस्तु कृत्रिमं दारुणं सदा॥२१॥

अमृत हो जाता है, कर्म योग से जो इस प्रत्यङ्गिरा महाविद्या का सदा जप करता है उसका कृत्रिम तथा दारुण अकालमृत्यु कभी नहीं होता है॥२१॥

भक्षितं तृप्तिमत्याशु नरस्य तस्य सुव्रते!।
तथाऽस्यां पठ्यमानायां जीर्यते नात्र संशयः॥२२॥

हे सुव्रते! प्रत्यङ्गिरा मन्त्र का पाठ करने वाले साधक के द्वारा खाये हुए समस्त पदार्थ शीघ्र ही पच कर उर्जा देते हैं, इस स्तोत्र के पाठक द्वारा खाये हुए भोजन स्वयं जीर्ण हो जाते हैं॥२२॥

नृणां रक्षाकरी देवी सर्वसिद्धिकरी स्मृता।
सर्वमन्त्रविनाशी च गोलकस्थान्तरः परा॥२३॥

सभी कार्यों को सिद्ध करने वाली, मनुष्यों की रक्षा करने वाली, अन्तःगोलक में रहने वाली, सभी यन्त्रतन्त्रमन्त्र के अभिचारिक प्रयोगों को समाप्त करने वाली माहेश्वरी

का साधक के द्वारा इस परामहाविद्या का ध्यान करने से समस्त कार्यों को सिद्ध कर लेता है॥२३॥

सर्वव्याधिहरी विद्या सिद्धिात्री महेश्वरी।
प्राप्नोति वसुधां सर्वां रिपुहस्तगतां श्रियम्॥२४॥

सभी व्याधियों का हरण करने वाली, सिद्धिदात्री महेश्वरी का विधिपूर्वक अर्चन करने से साधक शत्रुओं के हाथ में चली गयी अपनी भूमि तथा श्रेय को प्राप्त करता है॥२४॥

वशास्तस्यैव तिष्ठन्ति शत्रवः प्राणहारकाः।
अभ्यस्यतां याति विद्यां सिद्धिविद्याप्रसादतः॥२५॥

प्राणापहारक शत्रु भी इस महाविद्या के प्रभाव से साधक के वशीभूत हो जाते हैं। इस महाविद्या प्रत्यङ्गिरा के द्वारा जपानुष्ठान करके उसके फलस्वरूप महाविद्या के प्रभाव से समस्तविद्या (ज्ञान) प्राप्त कर लेता है॥२६॥

अवला च वशात्तस्य सुन्दर्यः प्रियदर्शनाः।
चराऽचरमिदं सर्वं सशैलवनकाननम्॥२६॥

हे सुव्रते! इस महाविद्या के प्रभाव से अनेक सुन्दर से सुन्दर स्त्रियाँ उस साधक के वश में हो जाती हैं, यह पर्वत, जङ्गल सहित समस्त चराचर जगत् जो नर नारियों से व्याप्त हैं, सभी इस महाविद्या के जपानुष्ठान से प्राप्त हो जाते हैं॥२६॥

नरनारीसमाकीर्णं साधकस्य च सुव्रते!।
सर्वत्र वशतां यान्ति यजमानस्य नित्यशः॥२७॥

हे सुव्रते! इस महाविद्या का अनुष्ठान करने वाला साधक समस्त नर-नारियों को आकर्षित कर लेता है, इस महाविद्या के नित्यनियमित अर्चन करने वाले साधक के वश में सभी हो जाते हैं॥२७॥

गोलकस्य प्रभावेण प्रत्यङ्गिराप्रभावतः।
त्रिपुरश्च मया दग्ध इमां विद्यां च बिभ्रता॥२८॥

इस अन्तः प्रत्यङ्गिरा महाविद्या के गोलक के प्रभाव से हमने पूर्वकाल में त्रिपुर को जला दिया था॥२८॥

निर्जितास्त्राऽसुराः सर्वे देवैर्विद्वगभिमानिभिः।
गोलकं च प्रवक्ष्यामि भैषज्यं ते च सुव्रते!॥२९॥

इस प्रत्यङ्गिरा महाविद्या का अनुष्ठान करके देवताओं ने असुरों पर विजय प्राप्त किया था। हे सुव्रते! अब मैं उस औषधि के समान गोलक का निरूपण तुमसे करता हूँ॥२९॥

पञ्चवर्णैः पञ्चदलैः द्वारर्धे द्वारशोभितम्।
द्वात्रिंशत्पत्रमध्ये तु लिखेन्मन्त्रस्य दैवतम्॥३०॥

द्वार के अर्धभाग (मध्य) में पाँच वर्णों वाले पाँच पत्तों से सुशोभित करके, उनके बीच बत्तीस पत्रों पर मन्त्र के देवताओं को लिखे॥३०॥

कूटस्थं कुरुते दिक्षु विदिक्षु बीजपञ्चकम्।
फट्कारेण च संयुक्तं रक्षेच्च साधकोत्तमः॥३१॥

चारो दिशाओं में मन्त्र के कूटाक्षर को लिखे, फिर चारों कोनों में बीज पञ्चक लिखे, इस प्रकार से लिखने के बाद **हुँ फट्** लिख करके यन्त्र बनाकर धारण करके साधक अपनी तथा अपनों की रक्षा करे॥३१॥

विष्णुक्रान्ता मदनकं कुङ्कुमं रोचनं तथा।
आरुष्करं विपारिष्टं सिद्धार्थं मालतीं तथा॥३२॥

विष्णुकान्ता, दमनक, कुंकुम, गोरोचन, अरुष, विषारिष्ट (विषहरी), सिद्धार्थ तथा मालती के पुष्पों तथा पदार्थों को मिलाकर गोलक के मध्य में स्थापित करे॥३२॥

एतद् द्रव्यगणं भद्रे! गोलमध्ये निधापयेत्।
सम्भृतं धारयन्मन्त्री साधको मन्त्रवित् सदा॥३३॥

हे भद्रे! पूर्वकथित पदार्थों को ग्रहण करके गोलक के मध्य स्थापित करके मन्त्रवित् साधक को सदा धारण करना चाहिए॥३३॥

अधुना सम्प्रवक्ष्यामि प्रत्यङ्गिरां सुभाषिताम्।
दिव्यमन्त्रपदैश्चित्तैः सुखोपायैः सुखप्रदैः॥३४॥

अब मैं समस्त सुख का उपाय, समस्त सुख को प्रदान करने वाला, प्रत्यङ्गिरा महामन्त्र को कहता हूँ, जिसे दत्तचित्त होकर सुनो॥३४॥

पठेद्रक्षाभिधानेन मन्त्रराजः प्रकीर्तितः।
अथाऽतो मन्त्रपदानि भवन्ति तानि मन्त्राणाम्॥३५॥

इसे मन्त्रराज कहते हैं, यह शत्रु विनाशक तथा रक्षक है, इसका अपनी रक्षा करने के लिए प्रयोग करना चाहिये। अब मैं महामन्त्र के पदों को उच्चारित करता हूँ, स्वस्थ चित्त से इसे सुनना चाहिए॥३५॥

मन्त्राण्युच्यन्ते—

ॐ नमः शिवाय सहस्त्रसूर्येक्षणाय ॐ अनादिरूपाय अनादिपुरूहूताय महामायाय महाव्यापिने महेश्वराय ॐ जगत् साक्षिणे सन्तापभूतव्यापिने महाघोराऽति-घोराय ॐ ॐ महाप्रभावं दर्शय दर्शय ॐ हिलि हिलि ॐ हन हन ॐ गिलि गिलि ॐ मिलि मिलि ॐ भूरि भूरि विद्युज्जिह्वे ज्वल ज्वल प्रज्वल प्रज्वल धम धम बन्ध बन्ध मथ मथ प्रमथ प्रमथ विध्वंसय विध्वंसय सर्वान् दुष्टान् ग्रस ग्रस पिब पिब नाशय नाशय त्रासय त्रासय भ्रामय भ्रामय दारय दारय द्रावय द्रावय दर दर विदुर विदुर विदारय विदारय रँ रँ रँ रँ रँ रक्ष रक्ष त्वं मां रक्ष रक्ष हूँ फट् स्वाहा॥

ॐ ऐं ऐं ह्रूं ह्रूं रक्ष रक्ष सर्वभूतभयोपद्रवेभ्यो महामेघौघ सर्वतोऽग्नि विद्युदर्क संवर्तकपर्दिनी दिव्यकणिकाम्भोरुह विकटपद्ममालाधारिणि सितिकण्ठाभ खट्वां कपालधृक् व्याघ्राजिनधृक् परमेश्वर प्रिये! मम शत्रून् छिन्धि छिन्धि भिन्धि भिन्धि विद्रावय विद्रावय देवतापितृपिशाचोरगनागाऽसुरगरुणगन्धर्वकिन्नरविद्याधरयक्ष राक्षसान् ग्रहाञ्च स्तम्भय स्तम्भय सपरिवारस्य मम शत्रवस्तान् सर्वान् निकृन्तय निकृन्तय ये सर्वे ममोपरि अविद्यां कर्म कुर्वन्ति कारयन्ति तेषां बुद्धिर्घातय घातय तेषां रोमं कीलय कीलय सर्वान् शत्रून् स्वाहा॥

ॐ ॐ विश्वमूर्ते महातेजसे ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां विद्यां स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां शिरमुखं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां नेत्रं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां हस्तौ स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां दन्तान् स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां जिह्वां स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां नाभिं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां गुह्यं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां पादौ स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां सर्वेन्द्रियाणि स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां कुटुम्बानि स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां स्थानं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां ग्रामं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां मण्डलं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां देशं स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः मम शत्रूणां प्राणान् स्तम्भय स्तम्भय किलय किलय ह्रूं फट् स्वाहा॥ ॐ सर्वसिद्धि महाभागे ममात्मनः सपरिवारस्य शान्तिं कुरु कुरु स्वाहा॥

ॐ ॐ ह्रूं ह्रूं फट् स्वाहा॥ ॐ ह्रूं ह्रूं ह्रूं ह्रूं ह्रूं फट् स्वाहा॥ ॐ ॐ ॐ ॐ ॐ यँ यँ यँ यँ यँ रँ रँ रँ रँ रँ लँ लँ लँ लँ लँ वँ वँ वँ वँ वँ शँ शँ शँ शँ शँ षँ षँ षँ षँ षँ सँ सँ सँ सँ सँ हँ हँ हँ हँ हँ ळँ ळँ ळँ ळँ ळँ क्षँ क्षँ क्षँ क्षँ क्षँ ह्रीँ ह्रीँ ह्रीँ ह्रीँ ह्रीँ क्लीँ क्लीँ क्लीँ क्लीँ क्लीँ ह्रूँ ह्रूँ ह्रूँ ह्रूँ ह्रूँ फट् स्वाहा॥ ॐ जः ॐ जः ॐ ठः ठः ॐ ह्रूं हुँ फट् स्वाहा॥ ॐ जूँ सः फट् स्वाहा॥ ॐ नमो प्रत्याङ्गिरे ममात्मानः सपरिवारस्य शान्तिं रक्षां कुरु कुरु स्वाहा॥

ॐ जः ॐ जः ॐ ठः ठः ॐ ह्रूँ ह्रूँ ह्रूँ ह्रूँ ह्रूँ ॐ ह्रूँ ह्रूँ फट् स्वाहा॥ ॐ नमो भगवती दुष्टचाण्डालिनि त्रिशूलवज्राङ्कुशशक्तिधारिणी रुधिरमांसवसाभक्षिणी कपालखट्वाङ्गधारिणी मम शत्रून् छेदय छेदय दह दह हन हन पच पच धम धम मथ मथ सर्वान्दुष्टान् ग्रस ग्रस ॐ ॐ ह्रूँ ह्रूँ फट् स्वाहा॥ ॐ ह्रूँ ह्रूँ ह्रूँ ह्रूँ ह्रूँ फट् स्वाहा॥ ॐ ह्रीँ ह्रीँ ह्रीँ ह्रीँ ह्रीँ दंष्ट्राकरालिनी मम शत्रूणां कृतमन्त्रतन्त्रयन्त्रप्रयोग-विषचूर्णशस्त्राद्यविचारसर्वोपद्रवादिकं येन कृतं कारितं कुरुते कारयन्ति करिष्यन्ति कारयिष्यन्ति तान् सर्वान् हन हन प्रत्यङ्गिरे! त्वं ममात्मनः सपरिवारस्य रक्ष रक्ष ॐ ह्रूँ ह्रूँ ह्रूँ ह्रूँ ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ फट् स्वाहा॥

ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ प्रत्यङ्गिरे मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ ब्राह्मी मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ वैष्णवी मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ माहेश्वरी मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ कौमारी मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ अपराजिता मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ वाराही मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ नारसिंही मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ चामुण्डा मम शरीरं रक्ष रक्ष ह्रूँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ प्रत्यङ्गिरे मम शरीरं सर्वतो सर्वाङ्गं रक्ष रक्ष ह्रूँ फट् स्वाहा॥

कूटस्था कुरुते दिक्षु विदिक्षु बीजपञ्चकम्।
फट्कारेण समोपेतं रक्ष त्वं साधकोत्तमम्॥१॥

चारों दिशाओं में कूट वर्णों को तथा चारों कोनों पर बीजपञ्चक लिखना चाहिए। फिर **रक्ष त्वं साधकोत्तमं** लिखना चाहिए।।१।।

स्तम्भिनी मोहिनी चैव क्षोभिणी द्राविणी तथा।
जृम्भिणी भ्रामिणी रौद्री तथा संहारिणीति च॥२॥

स्तम्भिनी, मोहिनी, क्षोभिणी, द्राविणी, जृम्भिणी, भ्रामणी, रौद्री, संहारिणी तथा शोषिणी ये सभी प्रत्यङ्गिरा की शक्तियाँ है।।२।।

शक्तयः शोषिणी चैव शत्रुपक्षनियोजितः।
साधिताः साधकेन्द्रेण सर्वशत्रुविनासिनी॥३॥

इन शक्तियों का शत्रुनाश के लिए नियोजित किया जाता है, साधक इस शक्तियों के सहित प्रत्यङ्गिरा को सिद्ध कर लेता है, तो वह साधक के शत्रुओं का विनाश कर देती है।।३।।

ॐ ऐँ ह्रीँ श्रीँ स्फ्रेँ स्फ्रेँ ह्रूँ ह्रूँ स्तम्भिनी मम शत्रून् स्तम्भय स्तम्भय हुँ फट्

स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रैँ स्फ्रैँ ह्रूँ ह्रूँ मोहिनी मम शत्रून् मोहय मोहय हुँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रैँ स्फ्रैँ ह्रूँ ह्रूँ क्षोभिणी मम शत्रून् क्षोभय क्षोभय हुँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रैँ स्फ्रैँ ह्रूँ ह्रूँ द्राविणी मम शत्रून् द्रावय द्रावय हुँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रैँ स्फ्रैँ ह्रूँ ह्रूँ जृम्भिणी मम शत्रून् जृम्भय जृम्भय हुँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रैँ स्फ्रैँ ह्रूँ ह्रूँ भ्रामिणी मम शत्रून् भ्रामय भ्रामय हुँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रैँ स्फ्रैँ ह्रूँ ह्रूँ रौद्री भम शत्रून् रौद्रय रौद्रय हुँ फट् स्वाहा॥ ॐ ऐँ ह्रीँ श्रीँ स्फ्रैँ स्फ्रैँ ह्रूँ ह्रूँ संहारिणी मम शत्रून् संहारय संहारय हुँ फट् स्वाहा॥

फलश्रुतिः

य इमां धारयेद्विद्यां त्रिसन्ध्यं वाऽपि यः पठेत्।
सोऽपि दुष्टान्तको भूत्वा हन्याच्छत्रून्न संशयः॥४॥

इस विद्या को धारण करके प्रातः, मध्याह्न, सायं तीनों कालों में जो पाठ करता है, वह अपने अतिदुष्ट शत्रुओं को भी समाप्त कर देता है, इसमें कोई संशय नहीं है॥४॥

सर्वं हि रक्षयेद् विद्यां महाभयविपत्तिषु।
महाभयेषु घोरेषु न भयं विद्यते क्वचित्॥५॥

महाभय उपस्थित होने पर, महाविपत्ति काल में, घोरतम भय होने पर इस विद्या से रक्षा करनी चाहिये, त्रिकाल पाठ करने वाले साधक को कोई भय नहीं होता है॥५॥

सर्वान् कामानवाप्नोति मर्त्यो देवी न संशयः।
अष्टोत्तरशतं जपेत्साक्षाद् सिद्धीश्वरो भवेत्॥६॥

भक्त इस मर्त्यलोक में समस्त कामनाओं की पूर्ति कर लेता है, इस विद्या का अष्टोत्तरशत जप करने से सिद्धि होती है, वह साधक सिद्धिश्वर हो जाता है॥६॥

ॐ ऐँ ह्रीँ श्रीँ स्फ्रैं स्फ्रैं हुं प्रत्यङ्गिरे! विकटदंष्ट्रे! ह्रीँ ह्रीँ कालिकालि! स्फ्रैं स्फ्रैं कारिणि मम शत्रून् छेदय छेदय खादय खादय सर्वान् दुष्टान् मारय मारय खड्गेन छिन्धि छिन्धि किलि किलि चिकि चिकि पिब पिब रुधिरं स्फ्रैँ स्फ्रैँ किरि किरि कालि कालि महाकालि महाकालि श्रीँ ह्रीँ ऐँ हुं हुं फट् स्वाहा॥

ऋषिस्तु भैरवो नाम छन्दोऽनुष्टुपप्रकीर्तितम्।
देवता कौशिकी प्रोक्ता नाम प्रत्यङ्गिरैव सा॥७॥

इस माला मन्त्र के भैरव ऋषि है, अनुष्टुप् छन्द है, इसके देवता कौशिकी (दुर्गा) हैं, इसे ही प्रत्यङ्गिरा भी कहते हैं॥७॥

कूर्चबीजं षडङ्गानि कल्पयेत् साधकोत्तमः।
सर्वाकृष्टोपचारैस्तु ध्यायेत् प्रत्यङ्गिरां शुभाम्॥८॥

इस मन्त्र का उत्तम साधक कूर्चबीज तथा षडङ्ग न्यास को स्वयं बना ले। प्रत्यङ्गिरा

भगवती को आकृष्ट करने वाले अनेक उत्तमोत्तम उपचारों से पूजन कर उसका ध्यान इस प्रकार करना चाहिए।।८।।

खड्गंकपालंडमरुंत्रिशूलं, सम्बिभ्रतीं चन्द्रकलावतंसम्।
पिङ्गोर्ध्व-केशाऽसित-भीम-दंष्ट्रा, भूयाद् विभूत्यै मम भद्रकाली।।९।

खड्ग, कपाल, डमरु तथा त्रिशूल को अपने हाथों में तथा मस्तक पर आभूषण रूप में चन्दमा को धारण किये हुए, जिनके पीले पीले केश ऊपर की तरफ विखरे हुए फैले हैं तथा दाँत काले और महाभयानक हैं वे भगवती भद्रकाली हमें विभूति प्रदान करे।।९।।

एवं ध्यात्वा जपेन्मन्त्रमेकविंशतिवासरान्।
शत्रून् सन्नाशयेत्तं च प्रकारोऽयं सुनिश्चितम्।।१०।।

इस प्रकार से ध्यानोपचारादि पूजन करके इक्कीस दिन तक नियमित निशा काल में पाठ करने से शत्रुओं का निश्चय ही नाश हो जाता है, यह निश्चित है।।१०।।

अथाऽष्टम्यामर्धरात्रौ शरत्काले महानिशि।
आराधिता च सा काली तत्क्षणात् सिद्धिदा भवेत्।।११।।

शरद् काल के नवरात्र में, जब अर्धरात्री में अष्टमी की महानिशा हो, उस समय आराधना करने से यह प्रत्यङ्गिरा भगवती अवश्य ही सिद्धि प्रदान करती है।।११।।

सर्वोपचार-सम्पन्नो रक्तवस्त्रफलादिभिः।
पुष्पैश्च रक्तवर्णैश्च साधयेत् कालिकां पराम्।।१२।।

पूजा की सम्पूर्ण सामग्री एकत्रित कर साधक लाल वस्त्र, लाल फल, तथा लाल रंग के पुष्पों से पराभगवती महाकाली का पूजन करे।।१२।।

वर्षादूर्ध्वमजं मेषं मृगं वा विविधं बलिम्।
दद्याद् पूर्वं महेशानि! ततस्तु जपमाचरेत्।।१३।।

हे महेशानि! सर्वप्रथम वर्षान्त जप करे, फिर जपोपरान्त बकरा अथवा भेंड़ा अथवा मृग तथा अन्याय विविध बलि देनी चाहिए तथा एक वर्ष तक जप करना चाहिए।।१३।।

एकहायनतः काली सत्यं सत्यं सुसिद्धिदा।
मूलमन्त्रेण रात्रौ च होमं कुर्याद् विचक्षणः।।१४।।

मूलमन्त्र से रात्रीकाल में हवन करना चाहिए ऐसा करने से काली एक वर्ष में सुसिद्ध हो जाती है, यह सत्य है और परमसत्य है।।१४।।

मरीच-लाजा-लवणैः सर्षपैर्मारणं भवेत्।
महासङ्कटरोगे च न भयं जायते क्वचित्।।१५।।

कालीमरीच, धान का लावा, नमक तथा सरसों मिलाकर होम करने से मारण प्रयोग किया जाता है, उक्त विधि से हवन करने से महासङ्कट तथा रोग का कभी भय नहीं होता है, साधक निर्भय हो जाता है।।१५।।

प्रेतपिण्डं समादाय गोलकं कारयेत्ततः।
साध्यनामाङ्कितं कृत्वा शत्रुमय्यां च पुत्तलीम्॥१५॥

श्मशान से प्रेत का शरीरांश (राखादि) ले करके गोलक बनाकर (यन्त्र का निर्माण करके) उसमें शत्रु की पुत्तली बना कर॥१५॥

जीवं तत्र विधायैव चिताग्नौ प्रक्षिपेत् ततः।
एकायुतं जपं कृत्वा त्रिरात्रान्मरणं रिपोः॥१६॥

उस पुत्तली में जीव की प्रतिष्ठा करके उसका हनन करके चिता की अग्नि में फेक कर जला करके दशहजार मन्त्र का जप करे, तो शत्रु तीन दिन में ही मर जाता है॥१६॥

महाज्वरो भवेत्तस्य तप्तताम्रशलाकया।
गुदाद्वारे प्रविन्यस्य सप्ताहान्मरणं रिपोः॥१७॥

जलती हुई ताँबे की सलाई उपर्युक्त विधि से निर्मित शत्रु की पुत्तली के गुदाद्वार में घुसेड़ देने से शत्रु को महाज्वर हो जाता है, वह सात रात्रि के भीतर ही मर जाता है॥१७॥

पुष्पसमर्पणविधिः

भुक्तौ मुक्तौ शान्तौ च श्वेतपुष्पं विनिर्दिशेत्।
आकृष्टो च वशीकारे रक्त पुष्पं च समर्पयेत्॥१८॥

पुष्पार्चन में भुक्ति, मुक्ति और शान्ति की कामना के लिए श्वेत पुष्प से करना चाहिए, आकर्षण, वशीकरण में रक्त पुष्प से समर्चन करना चाहिए॥१८॥

स्तम्भने मोहने चैव पीतं पुष्पं विनिर्दिशेत्।
उच्चाटने मारणे च कृष्णपुष्पं च आनयेत्॥१९॥

स्तम्भन और मोहन कार्य में पीले पुष्प से अर्चन करना चाहिए, उच्चाटन और मारण कार्य के लिए काले पुष्प से अर्चन करना चाहिए॥१९॥

अनेनैव प्रकारेण ध्यानं स्यात् पुष्पंवर्णकम्।
एवं पुष्पविधिः प्रोक्तः पूजादौ जपकर्मणि॥२०॥

इसी प्रकार से कामनाओं के अनुसार विभिन्न वर्णों के पुष्पों का चयन तथा ध्यान करना चाहिए, इस पुष्पार्चन की विधि जप के पूर्व करना चाहिए॥२०॥

भगवती के बायें हाथ में पाठ समर्पण कर अष्टोत्तरशत पुष्पाञ्जली प्रदान करे, समस्त कामना के लिए इक्कीस दिन वृद्धि क्रम से पाठ करे और पाठ के पहले और बाद मे १०८ पुष्पाञ्जली समर्पित करे, अलग-अलग कामनाओं के लिए अलग-अलग पुष्पों का चयन करना चाहिए, पद्धतिपाठ के बाद श्रीप्रत्यङ्गिरासहस्रनाम पाठ करे।

श्रीकुञ्जिकातन्त्रे प्रत्यङ्गिरापद्धतिः परिपूर्णम्

●

श्रीप्रत्यङ्गिरासहस्रनामस्तोत्रम्

ईश्वर उवाच

शृणु देवि प्रवक्ष्यामि साम्प्रतं त्वत्पुरःसरम्।
सहस्रनामपरमं प्रत्यङ्गिरायाः सिद्धये॥१॥

हे देवि! तुम्हारे सामने सर्वसिद्धि प्रदाता प्रत्यङ्गिरा का परमगुह्य सहस्रनाम कहते हैं॥१॥

सहस्रनामपाठेन सर्वत्र विजयी भवेत्।
पराभवो न चास्यास्ति सभायां व्यसने रणे॥२॥

जो इस सहस्रनाममहास्तोत्र का पाठ करता है, वह सर्वत्र विजयी होता है। उसका सभा में पराभव कभी नहीं होता है॥२॥

तथा तुष्टा भवेद्देवि! प्रत्यङ्गिरायाः पाठतः।
यथा भवति देवेशि साधकः शिव एव हि॥३॥

प्रत्यङ्गिरा सहस्रनाम के पाठ से श्रीप्रत्यङ्गिरा देवी सदा ही तुष्ट रहती हैं, साधक पर देवेशि के प्रसन्न होने से शिव भी सदैव प्रसन्न रहते हैं॥३॥

अश्वमेधसहस्राणि वाजपेयस्य कोटयः।
सकृत्पाठेन जायन्ते प्रसन्ना यत्परा भवेत्॥४॥

सहस्रों अश्वमेधयज्ञ, करोड़ों वाजपेय यज्ञ का फल इस देवि प्रत्यङ्गिरा के सहस्रनाम का पाठ करने वाले को प्राप्त हो जाता है॥४॥

भैरवोऽस्य ऋषिश्छन्दोऽनुष्टुप्देवी समीरिता।
प्रत्यङ्गिराविनियोगः स्यात्सर्वसम्पत्तिहेतवे॥५॥

इस सहस्रनाम के भैरव ऋषि हैं, अनुष्टुप्छन्द है, प्रत्यङ्गिरा देवता हैं, सभी सम्पत्ति की प्राप्ति के लिए विनियोग करना चाहिए॥५॥

सर्वकार्येषु संसिद्धिः सर्वसम्पत्तिदा भवेत्।
एवं ध्यात्वा पठेद्देवीं यदीच्छेदात्मनो हितम्॥६॥

सभी कार्यों की सिद्धि के लिए, सभी प्रकार की सम्पत्ति के लिए प्रत्यङ्गिरा देवि का ध्यानार्चन करने के बाद सहस्रनाम का पाठ करना चाहिए॥६॥

अथ ध्यानम्

खड्गंकपालंडमरुंत्रिशूलं सम्बिभ्रतीं चन्द्रकलावतंसा।
पिङ्गोर्ध्व-केशा-सित-भीम-दंष्ट्रा भूयाद् विभूत्या मम भद्रकाली॥७॥

खड्गकपालडमरु और त्रिशूल धारण की हुई, चन्द्रकलाओं को धारण की हुई, ऊपर उठे हुए काले काले केशोंवाली, बड़े बड़े दाँतोंवाली, भद्रकाली कल्याण करें॥७॥

विनियोग:—ॐ अस्य श्रीप्रत्यङ्गिरासहस्त्रनामस्तोत्रस्य भैरवऋषि:, अनुष्टुप्छन्द:, श्रीप्रत्यङ्गिरादेवता, ऐँ बीजं, ह्रीँ शक्ति:, श्रीँ कीलकं श्रीप्रत्यङ्गिरादेवताप्रीतये पुरश्चरण सिद्धये च पाठे विनियोग:।

ऋष्यादिन्यास:—

ॐ ऐँ ह्रीँ श्रीँ वामदेवऋषये नम: शिरसि।

ॐ ऐँ ह्रीँ श्रीँ अनुष्टुप्छन्दसे नम: मुखे।

ॐ ऐँ ह्रीँ श्रीँ श्रीमत्प्रत्यङ्गिरादेवतायै नम: हृदि।

ॐ ऐँ ह्रीँ श्रीँ ऐँ बीजाय नम: गुह्ये।

ॐ ऐँ ह्रीँ श्रीँ ह्रीँ शक्तये नम: पादयो:।

ॐ ऐँ ह्रीँ श्रीँ श्रीँ कीलकाय नम: नाभौ।

ॐ ऐँ ह्रीँ श्रीँ श्रीष्टदेवताप्रत्यङ्गिरायै नम: सर्वाङ्गे।

करन्यास:—

ॐ ऐँ ह्रीँ श्रीँ ऐँ अङ्गुष्ठाभ्यां नम:।

ॐ ऐँ ह्रीँ श्रीँ ह्रीँ तर्जनीभ्यां नम:।

ॐ ऐँ ह्रीँ श्रीँ श्रीँ मध्यमाभ्यां नम:।

ॐ ऐँ ह्रीँ श्रीँ प्रत्यङ्गिरं अनामिकाभ्यां नम:।

ॐ ऐँ ह्रीँ श्रीँ मम रक्ष रक्ष कनिष्ठिकाभ्यां नम:।

ॐ ऐँ ह्रीँ श्रीँ मम शत्रून् भक्ष भक्ष स्वाहा करतलकरपृष्ठाभ्यां नम:।

हृदयादिन्यास:—

ॐ ऐँ ह्रीँ श्रीँ ऐँ हृदयाय नम:।

ॐ ऐँ ह्रीँ श्रीँ ह्रीँ शिरसे स्वाहा।

ॐ ऐँ ह्रीँ श्रीँ श्रीँ शिखायै वषट्।

ॐ ऐँ ह्रीँ श्रीँ प्रत्यङ्गिरे कवचाय हुम्।

ॐ ऐँ ह्रीँ श्रीँ मम रक्ष रक्ष नेत्रत्रयाय वौषट्।

ॐ ऐँ ह्रीँ श्रीँ मम शत्रून् भक्ष भक्ष स्वाहा अस्त्राय फट्।

ध्यानम्—

ॐ क्षुत्क्षामां कोटराक्षीमसिमलिनमुखी मुक्तकेशी रुदन्ती,
नाहं तृप्ता वदन्ती जगदखिलमिदं ग्रासमेकं करोमि।
हस्ताभ्यां धारयन्तीं ज्वलदलनशिखासन्निभं पाशयुग्मं,
दन्तैर्जम्बूफलाभ: परिहरतु भयं पातु मां भद्रकाली॥

क्षकारवर्ण में समाहित, क्षकारवर्णात्मिका, सुषुम्ना के कोटर में अक्षरूप से विद्यमान, श्यामल वर्णवाली, मुक्तकेश वाली, अट्टहास करनेवाली, अतृप्त, एक ग्रास में ही सम्पूर्ण जगत् को खाँ जाऊगीं इस प्रकार से उद्घोष करती हुई, हाथों में जलती हुई अग्निशिखा तथा पाश धारण की हुई, जम्बूफल के समान चमकते हुए दाँतोंवाली भद्रकाली हमारे दुःख रूपी भय का सदैव नाश करें।

ॐ देविप्रत्यङ्गिरा सेव्या शिरसा शशिशेखरा।
सममासा धर्मिणी च समस्तसुरशीमुखी॥८॥
सर्वसम्पत्तिजननी समधासिन्धुसेविनी।
शम्भुसीमन्तिनी सोमाराध्या च वसुधारसा॥९॥
रसा रसवतीं वेला वन्या च वनमालिनी।
वनजाक्षी वनचरी वनीवनविनोदिनी॥१०॥
वेगिनी वेगदावेगबलस्थानबलाधिका।
कलाकलाप्रिया कौलिकोमला कालकामिनी॥११॥
कमला कमलास्या च कमलस्था कमलावती।
कुलीना कुटिलाकान्ता कोकिलाकुलभाषिणी॥१२॥
कीरकेलिः कलाकाली कपालिन्यपिकालिका।
केशिनी च कुशावर्त्ता कौशाम्बी केशवप्रिया॥१३॥
काशीकाशापहाकाशीशं काशाकेशदायिनी।
कुण्डलीकुण्डलीस्था च कुण्डलाङ्गदमण्डिता॥१४॥
कुशापाशीकुमुदिनी कुमुदप्रीतिवर्धिनी।
कुन्दप्रियाकुन्दरुचिः कुरङ्गमदमादिनी॥१५॥
कुरङ्गनयनाकुन्दा कुरुवृन्दाभिनन्दिनी।
कुसुम्भकुसुमा किञ्चित्क्वणत्किं किणिकाकटुः॥१६॥
कठोराकरणाकण्ठा कौमुदीकम्बुकण्ठिनी।
कपर्दिनी कपटिनी कठिनी कालकण्ठिका॥१७॥
किंबृहस्ताकुमारी च कुरुन्दाकुसुमप्रिया।
कुञ्जरस्थाकुञ्जरता कुम्भिकुम्भस्तनद्वया॥१८॥
कुम्भिगा करभोरुश्च कदलीदलशालिनी।
कुपिता कोठरस्था च कङ्कालीकन्दशेखरा॥१९॥
एकान्तवासिनी किंचित् कम्पमानशिरोरुहा।
कादम्बरीकदम्बस्था कुङ्कुमीप्रेमधारिणी॥२०॥
कुटुम्बिनीप्रियायुक्ता क्रतुःक्रतुकरीक्रिया।
कात्यायनी कृत्तिका च कार्तिकेयप्रवर्तिनी॥२१॥

कामपत्नीकामधात्री कामेशी कामवन्दिता।
कामरूपा कामगतिः कामाक्षी काममोहिता॥२२॥
खड्गिनी खेचरी खञ्जा खञ्जरीटेक्षणा खला।
खरगाखरनासा च खरास्याखेलनप्रिया॥२३॥
खड्गिनी खेचरीखट्वा खरखट्वाङ्गधारिणी।
खलखण्डिनीति विख्याता खण्डिताखण्डवीस्थिरा॥२४॥
खण्डप्रियाखण्डखाद्या सेन्दुखण्डा च खञ्जनी।
गंगागोदावरीगौरी गोमत्यादि च गौतमी॥२५॥
गयागौगजीगगना गारुडीगरुडध्वजा।
गीतागीतप्रियागोत्रा गोत्रक्षयकरी गदा॥२६॥
गिरिभूपालदुहिता गोगागोकुलवर्धिनी।
घनस्तनी घनरुचिर्घनोरुर्घननिःस्वना॥२७॥
घूत्कारिणी घूतकरी घुघूकपरिवारिता।
घण्टानादप्रियाघण्टा घनाघोटप्रवाहिनी॥२८॥
घोररूपा च घोरा च घूनीप्रीतिर्घनाञ्जनी।
घृताची घनमुष्टिश्च घटाघण्टाघटामृता॥२९॥
घटास्या घटनाद्यैश्च घातपातनिवारिणी।
चञ्चरीका चकोरी च चामुण्डा चीरधारिणी॥३०॥
चातुरी चपला चारुश्चला चेलाचलाचला।
चतुश्चिरन्तना चाकचिक्या चामीकरच्छविः चापिनी॥३१॥
चपलाचम्पूश्चितिताः चिन्तामणिश्चिता।
चातुर्वर्ण्यमयी चञ्चच्चौरा चापा चमत्कृतिः॥३२॥
चक्रवर्तिवधूश्चक्रा चक्राङ्गा चक्रमोदनी।
चेतश्चरी चित्तवृत्तिरचेता चेतनप्रदा॥३३॥
